# Shri Mahamari Sahasranama Stotram

# श्रीमहामारीसहस्रनामस्तोत्रम्

## Document Information

Text title : mahAmArIsahasranAmastotram

File name : mahAmArIsahasranAmastotram.itx

Category : devii, sahasranAma, devI, otherforms

Location : doc_devii

Author : Kittu Sir - Sri. T. S. Krishnamoorthy shAstri, Tetiyur, Tamil Nadu, India (1950)

Transliterated by : Sankara Dass Nagoji nagojip at gmail.com https://www.kanchimatamkudanthai.org

Proofread by : Dr. Veezhinathan, Mrs. Renuka Kamakoti, PSA Easwaran

Description/comments : See corresponding nAmAvalI

Latest update : September 13, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 13, 2020

*sanskritdocuments.org*

# श्रीमहामारीसहस्रनामस्तोत्रम्

ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

ॐ महामारी महामाया महामहिषवाहना ।
मद्यपानरता मत्ता मधुकैटभमर्दिनी ॥ १॥

मन्युवृत्ता महादेवी मदिरापानलम्पटा ।
महाहन्ता महाशान्ता महाकीर्तिर्महाबला ॥ २॥

महाशक्तिर्महावीर्या महावेगा मनीषिणी ।
महोत्पलधरा मन्युभीषणा महिमालया ॥ ३॥

महारूपा महाक्रूरा महामन्त्रा महायुधा ।
महाभक्षा महालक्ष्मीर्महाकाळी महोत्सवा ॥ ४॥

मस्तकाग्निर्महाहासा महिता मद्यलोलुपा ।
मरुद्गणा मदोन्मत्ता महातलनिवासिनी ॥ ५॥

मज्जा मलयजा मल्ला मन्दहासोज्ज्वलन्मुखी ।
महान्धकारशमनी महारण्यालयस्थिता ॥ ६॥

मनोज्ञा महितोदन्ता मदघूर्णितलोचना ।
महाश्रया महामुख्या महाजिह्वा मलापहा ॥ ७॥

महापद्मवनान्तस्था मञ्जुला मङ्गलालया ।
महेच्छा मन्मथस्तुत्या मदना मदमोहिनी ॥ ८॥

मर्मस्पृशा मत्स्यलोला महेशी मञ्जुभाषिणी ।
मनस्विनी महोद्वेगा महासङ्कटहारिणी ॥ ९॥

महासत्त्वा महानन्दा महाकामा महाशना ।
महाभगवती मह्या महारावा मनोन्मनी ॥ १०॥

महानलपदाचारा महाजनवरप्रदा ।
महाकामेश्वरीदूती महाकालाग्निरूपिणी ॥ ११॥

मकारादिक्षकारान्तवर्णमालाविलासिनी ।
महिला मन्दहासास्या महाराज्यप्रदायिनी ॥ १२॥

महाङ्कुशा महानादा महादुर्गा महेश्वरी ।
महावेशा महाढक्काधरा मङ्गलदायिनी ॥ १३॥

मङ्गला मधुरालापा महावेतालमर्दिनी ।
महागौरी महामाता महाकोलाहलप्रिया ॥ १४॥

महापिष्टाशनप्रीता महाविस्फोटरूपिणी ।
महाचण्डी महावीरा महाग्रासा महीमयी ॥ १५॥

महामोहान्धकारघ्नी महादारिद्र्यनाशिनी ।
महाशूला महेष्वासा महाकाशनिवासिनी ॥ १६॥

महारोगप्रशमनी महाभयविनाशिनी ।
महेशी मन्दगमना मन्दहासोज्ज्वलन्मुखी ॥ १७॥

मदालसगतिर्मन्त्ररूपिणी ममता मतिः ।
मयूरपिञ्छिकोत्तंसा महालावण्यशालिनी ॥ १८॥

महाहिवलया मन्युघोषणा मधुराकृतिः ।
महिषघ्नी महानिष्ठा मथुरापुरनायिका ॥ १९॥

महान्यासप्रिया मध्यमा मानसविहारिणी ।
मारी माया माननीया माधवप्रियसोदरी ॥ २०॥

माता मालाविभूषा मा मादिनी मार्गदर्शिनी ।
मागधीवनमध्यस्था माषान्नप्रीतमानसा ॥ २१॥

माहेश्वरी मानसौकवाहना मासरुपिणी ।
मायाहतासुरगणा मातृमण्डलमध्यगा ॥ २२॥

मालिनी मालतीजातीमल्लिकादिसमर्चिता ।
मित्रप्रिया मित्रपूज्या मिहिरारुणभास्वरा ॥ २३॥

मीमांसा मीननयना मीनकेतनपूजिता ।
मीनाक्षी मुद्गरधरा मुण्डिनी मुण्डमालिनी ॥ २४॥

मुख्या मुक्तावलीभूषा मुनिमानसहंसिनी ।
मुण्डादिदैत्यदर्पघ्नी मुसलायुधधारिणी ॥ २५॥

मूलमन्त्रात्मिका मूलाधारपद्मासनस्थिता ।
मूर्ता मूकासुरहरा मूलकर्मविनाशिनी ॥ २६॥

मृगनाभिलसत्कण्ठी मृद्वङ्गी मृगवाहना ।
मृदुपादाम्बुजा मृग्या मृदुला मृत्युनाशिनी ॥ २७॥

मृणालिका तन्तुनिभा मृगनाभिविलेपना ।
मृगाङ्कमुकुटा मृत्युमारी मृत्युञ्जयप्रिया ॥ २८॥

मेधा मेधावती मेघचारिणी मेखलावती ।
मैरेयपानसुप्रीता मोहध्वान्तदिवाकरा ॥ २९॥

मोहा मोहप्रदा मोहनाशिनी मोक्षदायिनी ।
मौञ्जी मौञ्जीधरा मौलिसर्पा मौनिजनप्रिया ॥ ३०॥

मन्दारकुसुमप्रख्या मन्त्रज्ञा मन्त्ररूपिणी ।
मञ्जुप्रसन्नवदना मञ्जुला मङ्गलप्रदा ॥ ३१॥

मांसला मांसनिलया मांसभक्षणलालसा ।
यशस्विनी यताहारा यमबाधाविनाशिनी ॥ ३२॥

यज्ञोपवीतिनी यज्ञफलदा यतमानसा ।
यथार्थवचना यन्त्रनिलया यज्ञरक्षिणी ॥ ३३॥

यज्ञमाता यज्ञभोक्त्री यज्ञेशी यज्ञसम्भवा ।
यज्ञक्रिया यज्ञरूपा यज्ञाङ्गी यन्त्रमध्यगा ॥ ३४॥

यवागूपानसुप्रीता यज्ञधूपकुतूहला ।
यमुना यरलवाकारा यक्षराज्ञी यजुःस्वरा ॥ ३५॥

यशोदा यन्त्रनटना यक्ष्मरोगविनाशिनी ।
यमा यक्ष्महरा यष्टिधारिणी यजनप्रिया ॥ ३६॥

यक्षिणी यक्षगन्धर्वपूजिता यमरूपिणी ।
यामिनी यामिनीनाथपूजिता यानवाहिनी ॥ ३७॥

यात्रिकैकसहाया या यामिनीमध्यचारिणी ।

यामसञ्चारिणी यागरक्षिणी यागसम्भवा ॥ ३८॥

युवतिर्युद्धनिपुणा युगान्ताग्निविलोचना ।
युक्ता युगपरा युद्धरेणुका युद्धदुर्मदा ॥ ३९॥

यूथमध्या यूथसेव्या यूपबद्धबलिप्रिया ।
योषा योधा योगनिष्ठा योगिनीगणमध्यगा ॥ ४०॥

योगप्रदा योगरूपा योगिनी योधकारिणी ।
योगासना योगनिद्रा योग्या योगिजनप्रिया ॥ ४१॥

योगगम्या योगपरा योगिहृत्पद्मवासिनी ।
योषित्पूजनसुप्रीता योषित् योषित्स्वरूपिणी ॥ ४२॥

योङ्क्री यौवनमध्यस्था यन्त्रबिन्द्वर्चनप्रिया ।
रक्ताम्बरा रक्तमुखी रक्ताक्षी रक्तपायिनी ॥ ४३॥

रक्ताभिषेकसन्तुष्टा रविमण्डलमध्यगा ।
रक्तोत्पलधरा रक्तनिलया रजनीप्रिया ॥ ४४॥

रक्षा रक्षाकरी रत्नभूषणा रजनीचरा ।
रम्या रमा रसमयी रजनीकरशेखरा ॥ ४५॥

रमणी रामजननी रम्भा रमणलम्पटा ।
रम्भाफलप्रिया रत्नकटका रणभैरवी ॥ ४६॥

रजस्वला रजोरूपा रसाभिज्ञा रजोगुणा ।
रथिनी रजताकारा रता रतिपतिप्रिया ॥ ४७॥

रसालया रज्जुहस्ता रविनेत्रा रतिप्रिया ।
रञ्जिनी रणसन्तुष्टा रक्षोघ्नी रणकालिका ॥ ४८॥

रमाज्ञापालिनी रत्नभूषणा रसशेवधिः ।
रक्तबीजादिसंहर्त्री रक्तपानकुतूहला ॥ ४९॥

रणप्रिया रणकरी राकाचन्द्रसमानना ।
रागस्वरूपिणी रागालापसंसक्तमानसा ॥ ५०॥

राक्षसी राहुमुकुटा राज्ञी राज्यसुखप्रदा ।
राजीवनयना रात्रिपूजिता रात्रिचारिणी ॥ ५१॥

राधिका राजमातङ्गी राजहंससमक्रमा ।
राजराजार्चिता राज्यपालिनी राजकन्यका ॥ ५२॥

राज्यलक्ष्मी रिपुहरा रीतिज्ञा रुष्टमानसा ।
रुन्धिनी रुक्मिणी रुक्मवर्णा रुधिरलालसा ॥ ५३॥

रुद्राणी रुचिरप्रख्या रुण्डा रुद्रविलासिनी ।
रुद्रकाळी रुद्रदुर्गा रुधिरार्द्रीकृताकृतिः ॥ ५४॥

रुष्टा रुद्रकला रुद्रकोपा रुचिरभक्षिणी ।
रुद्रावेशा रुद्रमयी रुद्रास्या रुरुवाहना ॥ ५५॥

रुचाहस्ता रूपवती रूषिताहारलोलुपा ।
रूपलक्षणसम्पन्ना रूपिणी रूपवर्जिता ॥ ५६॥

रूपार्कविग्रहा रूप्यशैलमध्यनिवासिनी ।
रोदसी रोषसंरक्तनयना रोगनाशिनी ॥ ५७॥

रोहिणी रोषिणी रोषज्वालिनी रोषवर्जिता ।
रोषावेशाहतारातिमण्डला रौद्ररूपिणी ॥ ५८॥

रौद्रकोपा रङ्गमारी रञ्जिनी रङ्गमालिनी ।
रञ्जिता रम्यवदना रंहो राङ्गलधारिणी ॥ ५९॥

लवित्रधारिणी लक्ष्या लकुली लक्षणोज्ज्वला ।
लक्षाण्डनायिका लज्जा ललिता लक्षणप्रदा ॥ ६०॥

लघिमा लक्ष्यदा लभ्या लघुश्यामा लयेश्वरी ।
ललज्जिह्वा लब्धवर्णा लवङ्गी लशुनाशना ॥ ६१॥

लघ्वी लता ललत्केशा लसन्ती लवणाशना ।
लयस्थित्युद्भवाधीशा लघुपूजाप्रसादिनी ॥ ६२॥

लक्ष्मणाग्रजसम्पूज्या लब्धसर्वमनोरथा ।
लम्पटा लवसन्तुष्टा लङ्कानगरवासिनी ॥ ६३॥

लावण्यविग्रहा लाभदायिनी लास्यतोषिणी ।
लास्यप्रिया लास्यलोला लासिनी लाजभक्षिणी ॥ ६४॥

लालसा लासिकालास्या लावण्यगुणशालिनी ।
लाक्षारससवर्णाभा लाङ्गलायुधधारिणी ॥ ६५॥

लिप्सा लिप्तालिङ्गपूज्या लिङ्गिनी लिङ्गवर्जिता ।
लिप्तगोरोचना लिप्तचन्दना लिकुचस्तनी ॥ ६६॥

लिकुचान्नप्रिया लीला लीलासृष्टजगत्त्रया ।
लीलावती लुब्धमना लुब्धा लुञ्छितकेशिनी ॥ ६७॥

लेलिहानशिखा लेखा लेशपूजाप्रसादिनी ।
लोहिता लोलनयना लोकेशी लोकपालिनी ॥ ६८॥

लोलम्बमालिनी लोकवन्दिता लोहितेक्षणा ।
लौकिकी लौकिकाचारा लम्बमानपयोधरा ॥ ६९॥

लं-बीजरूपिणी वन्द्या वरदा वसुमालिनी ।
वशिनी वसुमध्यस्था वसुमण्डलपूजिता ॥ ७०॥

वशित्वदायिनी वज्रधारिणी वल्लकीप्रिया ।
वनिता वन्दिता वर्णा वरिष्ठा वरदायिनी ॥ ७१॥

वसुधा वरुणाराध्या वत्सला वटयक्षिणी ।
वनमध्यस्थिता वन्या वसुदा वनमल्लिका ॥ ७२॥

वनकेलिरता वक्रकेशिनी वर्णिनी वरा ।
वलक्षा वज्रनिर्घोषा वरेण्या वनकन्यका ॥ ७३॥

वरदा वल्लभा वत्सा वराभीतिलसत्करा ।
वदन्ती वर्मिणी वश्या वल्लकीवादनप्रिया ॥ ७४॥

वराभीतिलसत्पाणिर्वन्दारुजनपालिनी ।
वयस्या वर्धिनी वर्या वह्निमण्डलवासिनी ॥ ७५॥

वह्निस्वरूपिणी वह्निनयना वल्गुभाषिणी ।
वरिवस्यारता वामा वाराही वायुवाहना ॥ ७६॥

वारुणीपानसुप्रीता वानरी वाहनप्रिया ।
वामाचारवती वाममार्गपूजाप्रसादिनी ॥ ७७॥

वाणी वायुसमाराध्या वासवादिसुरार्चिता ।
वादित्रघोषसुप्रीता वारुणीमदघूर्णिता ॥ ७८॥

वाग्वादिनी वामकेशी वाजिवाहनगामिनी ।

विश्वम्भरा विशालाक्षी विषमा विष्णुसोदरी ॥ ७९॥

विविधायुधसन्नद्धा विष्णुमाया विराण्मयी ।
विपुलाङ्गी विघ्नदात्री विचित्रा विघ्नहारिणी ॥ ८०॥

विहायसगतिर्विद्याधरी विश्वविमोहिनी ।
वियत्केशी विरूपाक्षी विमला विकरालिनी ॥ ८१॥

विश्वग्रासा विष्णुरूपा विजनालयवासिनी ।
विकारा विपिनावासा विश्वासा विधिवन्दिता ॥ ८२॥

विभावरी विद्रुमाभा विद्रुमाभरणोज्ज्वला ।
विभूतिर्विष्णुवनिता विशदा विश्वमोहिनी ॥ ८३॥

विषमा विबुधाराध्या विनता विश्वसाक्षिणी ।
विस्फोटकी विरूपाक्षी विन्ध्याचलनिवासिनी ॥ ८४॥

विनोदा विष्णुभगिनी विप्रकारी विशारदा ।
विशाला विपुला विप्रवन्दिता विपुलस्तनी ॥ ८५॥

विश्ववन्द्यपदाम्भोजा विचित्राभरणोज्ज्वला ।
विस्तारजघना विद्या विधुमण्डलवासिनी ॥ ८६॥

विमाना विमना विश्वा विजया विपिनालया ।
विविधान्नप्रिया वित्तदायिनी विपुलोदना ॥ ८७॥

विषूचिर्विषसंहर्त्री वीरवन्द्यपदाम्बुजा ।
वीरमाता वीरशक्तिः वीरा वीरपराक्रमा ॥ ८८॥

वीरासना वीतिहोत्रनयना वीरवन्दिता ।
वीरमारी वीरदुर्गा वीथीसञ्चारलालसा ॥ ८९॥

वीणावादनसुप्रीता वृद्धा वृजिननाशिनी ।
वेला वेगवती वेगा वेदान्तप्रतिपादिता ॥ ९०॥

वेगिता वेदजननी वेषाढ्या वेत्रधारिणी ।
वेदना वेदनाहर्त्री वैदिकी वैरिमर्दिनी ॥ ९१॥

वैकुण्ठवासिनी वैश्वानरमध्यकृतालया ।
वैशाखपूर्णिमापूजाप्रीता वैश्वानरेक्षणा ॥ ९२॥

वैदेही वैष्णवी वैरिवर्जिता व्योमवासिनी ।
व्योमालया व्योमकेशी वौषड् व्यालिविभूषिता ॥ ९३॥

वंशाभिरक्षिणी वंशदेवता वेङ्कटेश्वरी ।
शमदा शर्मदा शब्दरूपिणी शरधारिणी ॥ ९४॥

शर्वाणी शबला शक्रवन्दिता शत्रुसूदिनी ।
शक्तिः शवासना शक्तिवृन्दसेवितपादुका ॥ ९५॥

शकुन्तवाहना शम्भुमोहिनी शशिशेखरा ।
शशाङ्काभमुखी शस्त्रधारिणी शमदमोज्ज्वला ॥ ९६॥

शमा शनैश्चरप्रीता शवपञ्चकमञ्चगा ।
शरासनकरा शब्दब्रह्मरूपा शरासना ॥ ९७॥

शताक्षी शतभूषाढ्या शरतल्पाधिशायिनी ।
शरीरिणी शतस्फोटरूपिणी शशिभूषणा ॥ ९८॥

शारदा शारदाराध्या शाम्भवी शास्त्रवेदिता ।
शार्दूलवाहना शास्त्रविद्या शासनकारिणी ॥ ९९॥

शान्तिःशान्तिमती शान्तिदायिनी शान्तमानसा ।
शाकम्भरी शापहन्त्री शाकिन्यादिसमन्विता ॥ १००॥

शिवा शिवप्रिया शिल्पकला शिशुसमाकृतिः ।
शिल्पिनी शिखिमध्यस्था शिवदूती शिवङ्करी ॥ १०१॥

शिष्टा शिष्टसमाचारा शिष्टेष्टा शीतलाम्बिका ।
शीतला शीतलादेवी शीता शीतनिवारिणी ॥ १०२॥

शीला शीलवती शीधुपानलोलुपमानसा ।
शीतज्वरहरा शीघ्रवरदा शुक्रपूजिता ॥ १०३॥

शुद्धा शुष्का शुक्लवर्णा शुष्काङ्गी शुभदायिनी ।
शुभा शुभान्विता शुम्भदैत्यसंहारिणी शुचिः ॥ १०४॥

शुचिस्मिता शुकप्रीता शुकालापा शुभोदया ।
शुक्रवारप्रिया शून्या शूलिनी शूलधारिणी ॥ १०५॥

शूरसेना शून्यरूपा शून्यकेश्वरनाशिनी ।
शूर्पहस्ता शूलरोगहारिणी शूर्पमस्तका ॥ १०६॥

श्रद्धा श्रमहरा श्रद्धावती शृङ्गारनायिका ।
श्रीः श्रीमती श्रुतिज्ञेया श्रुतिबोधितवैभवा ॥ १०७॥

श्रुत्यन्तज्ञेयसौभाग्या शृङ्खलामोचिनी श्रुतिः ।
श्रोत्रिया श्रुतचारित्रा श्रोणिशोभाजिताचला ॥ १०८॥

श्रीं-बीजनिलया शेषमुकुटा शेषशायिनी ।
शेखरीकृतशीतांशुः शेमुषी शैलवासिनी ॥ १०९॥

शैवी शैवालया शैलकन्या शैलादिवाहना ।
शैवमञ्चकपीठस्था शोभाजितदिवाकरा ॥ ११०॥

शोभिनी शोकशमनी शोभा शोभनकारिणी ।
शोणाभा शोणितप्रीता शोधिनी शोभनाकृतिः ॥ १११॥

शोकहीना शोकहन्त्री शोरिमायास्वरूपिणी ।
शौण्डा शौर्यप्रदा शङ्खहस्ता शङ्करभामिनी ॥ ११२॥

शङ्कराभरणप्रीता शङ्खपद्मनिधिस्तुता ।
शान्त्यतीतकलारूपा शान्ता षट्कोणवासिनी ॥ ११३॥

षष्ठी षट्चक्रनिलया षडध्वातीतरूपिणी ।
सकला सकलाराध्या सकलेष्टवरप्रदा ॥ ११४॥

सप्तमी समयाचारा सप्तस्वरमयाकृतिः ।
सर्वदा सर्पभूषाढ्या सर्वमङ्गलदायिनी ॥ ११५॥

सगुणा सद्गुणा सत्त्वगुणा समरसा समा ।
सभ्या सरस्वती सर्वमङ्गला सगुणात्मिका ॥ ११६॥

सर्वार्थदायिनी सर्वमन्त्रयन्त्राधिनायिका ।
साकिनीरूपिणी साध्या साध्वी सादादिरूपिणी ॥ ११७॥

साक्षिभूता सामरस्यपरा साध्वसनाशिनी ।
सिद्धमन्त्रा सिद्धिदात्री सिद्धगन्धर्वपूजिता ॥ ११८॥

सिताम्भोजालया सिद्धा सिन्दूरतिलकोज्ज्वला ।
सीमा सीता सीधुपानप्रिया सीमाधिदेवता ॥ ११९॥

सुमुखी सुभगा सुभ्रूः सुन्दरी सुन्दरानना ।

सुराप्रिया सुवर्णाभा सुराधिपनमस्कृता ॥ १२० ॥

सुधा सुधार्णवाध्यक्षा सुरापानकुतूहला ।
सूचकी सूर्यनयना सूकरी सूकरानना ॥ १२१ ॥

सृणिहस्ता सृष्टिकर्त्री सेव्या सेनाग्रगामिनी ।
सैरिभासुरसंहर्त्री सोमाक्षी सोमवल्लरी ॥ १२२ ॥

सोममण्डलमध्यस्था सौम्या सौदामिनीप्रभा ।
सौभाग्यदायिनी सौख्यदात्री सौं-बीजरूपिणी ॥ १२३ ॥

सम्पत्करी संशयघ्नी सम्राज्ञी सङ्गमक्षमा ।
संयुगामोदिनी संविद्रूपिणी सन्ततिप्रदा ॥ १२४ ॥

सन्ध्या सङ्कष्टसन्दोहहन्त्री सन्धानकारिणी ।
सुन्दोपसुन्दसंहर्त्री सान्द्रानन्दस्वरूपिणी ॥ १२५ ॥

स्निग्धौदनप्रिया स्निग्धा स्मृतिः स्मेरमुखाम्बुजा ।
हरदूती हयारूढा हसन्ती हरभामिनी ॥ १२६ ॥

हरिद्रान्नैकरसिका हरिद्रा हरिसोदरी ।
हतदैत्यमहासेना हठात्कारहतासुरा ॥ १२७ ॥

हरिद्रालिप्तसर्वाङ्गी हविर्भोक्त्री हलायुधा ।
हाकिनी हास्यसन्तुष्टा हाटकाभरणोज्ज्वला ॥ १२८ ॥

हाहाहूहूमुखस्तुत्या हालामदविघूर्णिता ।
हिमांशुबिम्बवदना हिमालयकृतालया ॥ १२९ ॥

हिमांशुशकलोत्तंसा हिता हिमकरेक्षणा ।
हुम्फडुच्चारणप्रीता हुङ्कारातिभयङ्करा ॥ १३० ॥

हुङ्कारनिहतानेकदैत्या हूहूप्रपूजिता ।
हृद्या हेमप्रभा हेतिविभूषितकराम्बुजा ॥ १३१ ॥

हेमदात्री हेमवर्णा हेलानिहतदुर्जना ।
हेलालोला हैमवती होत्री होतृवरप्रदा ॥ १३२ ॥

होमाग्निकुण्डमध्यस्था होमकर्मैकसाक्षिणी ।
हौं-बीजजपसुप्रीता हंसाक्षी हंसवाहना ॥ १३३ ॥

ळं-बीजजपसुप्रीता ळं-बीजाक्षररूपिणी ।
क्षपापूजनसुप्रीता क्षयरोगहरा क्षमा ॥ १३४॥

क्षपाकरलसन्मौलिः क्षपासञ्चारिणी क्षपा ।
क्षालिताशेषपापौघा क्षामदुर्भिक्षनाशिनी ॥ १३५॥

क्षिप्रपूजारता क्षिप्रफलदा क्षिप्रकारिणी ।
क्षिप्रप्रसादिनी क्षिप्रमारी क्षितिधरा क्षितिः ॥ १३६॥

क्षीणपापा क्षीरपानप्रिया क्षीरान्नभोजिनी ।
क्षुद्ररोगहरा क्षुद्रकृत्यानाशनकारिणी ॥ १३७॥

क्षुद्रग्रहार्तिशमनी क्षेत्रक्षेत्रज्ञरूपिणी ।
क्षेत्रपालप्रिया क्षेमदायिनी क्षेत्रपालिनी ॥ १३८॥

क्षौमाम्बरपरीधाना क्षौद्रामृतरसप्रिया ।
क्षं-बीजजपसुप्रीता क्षं-बीजाक्षररूपिणी ॥ १३९॥

अम्बिकानादिनिधनाराधनप्रीतमानसा ।
इन्द्राणीन्दिरेशानवल्लभोद्दण्डविक्रमा ॥ १४०॥

उग्रमार्युदितार्काभदेहैनःकूटनाशिनी ।
ऐश्वर्यदायिन्यैङ्कारबीजवर्णस्वरूपिणी ॥ १४१॥

ओष्ठच्छविविनिर्धूतबिम्बाभौङ्कारमातृका ।
अकारादिविसर्गान्तवर्णमालास्वरूपिणी ॥ १४२॥

कमला कलना कर्मसाक्षिणी करुणालया ।
कल्मषघ्नी कलिध्वंसकारिणी कर्कशस्वरा ॥ १४३॥

कात्यायनी कालरात्रिः किन्नरी कीर्तिदायिनी ।
कुरुकुल्ला कुवलयदलनीलायतेक्षणा ॥ १४४॥

कुष्ठरोगप्रशमनी कूश्माण्डग्रहनाशिनी ।
कृपा कृपावती कृष्णमारी कृत्यानिवारिणी ॥ १४५॥

केवला कोपविध्वस्तसमस्ता सुरमण्डला ।
कौमारी कौशिकी कंसमर्दिनी खलनाशिनी ॥ १४६॥

गजारूढा गतिर्गानलोला गीतविशारदा ।
गुर्वी गुहप्रिया गूढविग्रहा गृध्रवाहना ॥ १४७॥

ग्रामरक्षाकरी ग्रामदेवी घर्घरनादिनी ।
चण्डमारी चण्डघण्टा चण्डिका चारुविक्रमा ॥ १४८॥

चिरन्तना चित्रमाल्यभूषणा चेटकावृता ।
छलविध्वस्तदैत्येन्द्रा जयश्रीर्जगदीश्वरी ॥ १४९॥

टङ्कहस्ता ठान्तमन्त्रा डमरुध्वनिमोदिता (हर्षिणी) ।
ढक्काधरी तडिल्लेखा दाडिमीकुसुमप्रभा ॥ १५०॥

देवी देवनुता दैत्यमर्दिनी दोषवर्जिता ।
दन्तपङ्क्तिप्रभापुञ्जतिरस्कृतदिवाकरा (रविद्युतिः ) ॥ १५१॥

धनधान्यकरी धान्यमालिनी नवचण्डिका ।
नादब्रह्ममयी पानपात्रहस्ता पराम्बिका ॥ १५२॥

फलदा बन्धनिर्मोक्त्री भेरुण्डा भयहारिणी ।
मदद्रवा यशोदात्री रहस्या ललितालका ॥ १५३।
वह्निरूपा श्मशानस्था षडङ्गपरिवारिता ।
समस्तदेवविनुता सर्वदेवस्वरूपिणी ॥ १५४॥

समस्तशक्तिचक्रेशी हृदयङ्गमरूपिणी ।
इत्युक्तं नामसाहस्रं महामार्याः शुभावहम् ।
सर्वपापप्रशमनं सर्वरोगनिवारणम् ।
सर्वार्थसाधकं पुण्यमैहिकामुष्मिकार्थदम् ।
समस्तदेवताप्रीतिदायकं परमाद्भुतम् ।
यः पठेत्प्रयतो दुर्गाकाले प्रयतमानसः ।
महामार्याः प्रसादेन स नूनं लभते शुभम् ।
मारीनामसहस्रस्य नान्यदस्य समं क्वचित् ।
पुरा विरचितं पूर्वैः निरीक्ष्य सुपरिष्कृतम् ॥

इति तेतियूरवासी ब्रह्मश्री कृष्णमूर्तिशास्त्रिण् विरचितं
श्रीमहामारीसहस्रनामस्तोत्रं सम्पूर्णम् ॥

The author of the work is Sri. T. S. Krishnamoorthy shAstri.
He is popularly known as “kittu sir” in the neighboring villages.
Sri Kittu sir hails from the village Tediyur

(Thiruvarur district, Tamil Nadu) and served as sanskrit pandit in Vishnupuram and Semmangudi villages. Timeline: 4-July-1926 to 1-Jan-2009. He had worked in Thanjavur Saraswathi Mahal library in his later years.

This work is preserved by his student Dr. N. Veezhinathan, who received the President's award for Sanskrit in 2002.

Dr. Veezhinathan is the primary proof reader.
Encoded by Sankara Dass Nagoji nagojip at gmail.com
Proofread by Mrs. Renuka Kamakoti, PSA Easwaran

---

*Shri Mahamari Sahasranama Stotram*
pdf was typeset on September 13, 2020

Please send corrections to *sanskrit@cheerful.com*